# विश्वनाथाष्टकम्

viśvanāthāṣṭakam

गङ्गातरंग रमणीय जटाकलापं गौरीनिरन्तर विभूषित वामभागम्।

नारायणप्रिय मनंग मदापहारं वाराणसीपुरपतिं भज विश्वनाथम्॥

gaṅgātaraṅga ramaṇīya jaṭākalāpaṁ gaurī nirantara vibhūṣita vāmabhāgam ।
nārāyaṇapriya manaṅga madāpahāraṁ vārāṇasīpurapatiṁ bhaja viśvanātham ।।

वाचामगोचरमनेकगुणस्वरूपं वागीशविष्णुसुरसेवितपादपीठम्।

वामेनविग्रहवरेणकलत्रवन्तं वाराणसीपुरपतिं भज विश्वनाथम्॥

vācāmagocara maneka-guṇasvarūpaṁ vāgīśaviṣṇu surasevitapādapīṭam
vāmena vigraha-vareṇa kalatravantaṁ vārāṇasīpurapatiṁ bhaja viśvanātham ।।

भूताधिपं भुजगभूषण भूषितांगं व्याघ्राजिनां बरधरं जटिलं त्रिनेत्रम्।

पाशांकुशाभयवरप्रदशूलपाणिं वाराणसीपुरपतिं भज विश्वनाथम्॥

bhūtādhipaṁ bhujagabhūṣaṇa bhūṣitāṅgaṁ vyāghrājināṁ baradharaṁ jatilaṁ trinetram
pāśāṅkuśābhayavarapradaśūlapāṇiṁ vārāṇasīpurapatiṁ bhaja viśvanātham ।।

शीतां सुशोभित किरीट विराजमानं भालेक्षणानल विशोषित पंचबाणम्

नागाधिपा रचित भासुर कर्णपूरं वाराणसीपुरपतिं भज विश्वनाथम्॥

śītāṁ suśobhita kirīṭa virājamānaṁ bhālekṣaṇānala viśoṣita pañcabāṇam
nāgādhipāracita bhāsura karṇapūraṁ vārāṇasīpurapatiṁ bhaja viśvanātham ।।

पंचाननं दुरितमत्तमतङ्गजानां नागान्तकं दनुज पुंगव पन्नगानाम्

दावानलं मरणशोक जराटवीनां वाराणसीपुरपतिं भज विश्वनाथम्॥

pañcānanaṁ duritamattamataṅgajānāṁ nāgāntakaṁ danuja puṅgava pannagānām
dāvānalaṁ maraṇaśoka jarāṭavīnāṁ vārāṇasīpurapatiṁ bhaja viśvanātham ।।

तेजोमयं सगुणनिर्गुण मद्वितीयं आनन्दकन्दमपराजितमप्रमेयम्

नागात्मकं सकल निष्कलमात्मरूपं वाराणसीपुरपतिं भज विश्वनाथम् ॥

tejomayaṁ saguṇanirguṇa madvitīyam ānandakandamaparājitamaprameyam
nāgātmakaṁ sakala niṣkalamātmarūpaṁ vārāṇasīpurapatiṁ bhaja viśvanātham ||

आशां विहाय परिहृत्य परस्य निन्दां पापे रतिं च सुनिवार्य मनः समाधौ ।

आदाय हृत्कमलमध्यगतं परेशं वाराणसीपुरपतिं भज विश्वनाथम् ॥

āśāṁ vihāya parihṛtya parasya nindāṁ pāpe ratiṁ ca sunivārya manaḥ samādhau
ādāya hṛtkamalamadhyagataṁ pareśaṁ vārāṇasīpurapatiṁ bhaja viśvanātham ||

रागादि दोषरहितं स्वजनानुरागं वैराग्य शान्तिनिलयं गिरिजासहायम्

माधुर्यधैर्य सुभगं गरलाभिरामं वाराणसीपुरपतिं भज विश्वनाथम् ॥

rāgādi doṣarahitaṁ svajanānurāgaṁ vairāgya śāntinilayaṁ girijāsahāyam
mādhuryadhairya subhagaṁ garalābhirāmaṁ vārāṇasīpurapatiṁ bhaja viśvanātham ||

वाराणसीपुरपतेः स्तवनं शिवस्य व्याख्यातमष्टकमिदं पठते मनुष्यः

विद्यां श्रियं विपुलसौख्यमनन्तकीर्तिं सम्प्राप्य देहविलये लभते च मोक्षम् ॥

vārāṇasīpurapateḥ stavanaṁ śivasya vyākhyātamaṣṭakamidaṁ paṭhate manuṣyaḥ
vidyāṁ śriyaṁ vipulasaukhyamanantakīrtiṁ samprāpya dehavilaye labhate ca mokṣam ||

विश्वनाथाष्टकमिदं पुण्यं यः पठेत् शिवसन्निधौ

शिवलोकमवाप्नोति शिवेन सह मोदते ॥

viśvanāthāṣṭakamidaṁ puṇyaṁ yaḥ paṭhet śivasannidhau
śivalokamavāpnoti śivena saha modate ||